॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

५८

व्याकरणाचार्यपरीक्षोपयोगी

# प्रबन्धसङ्ग्रहः

लघ्वतिलघुप्रश्नोत्तरसमन्वितः

निबन्धकारः

**डॉ० ब्रह्मानन्द त्रिपाठी**

साहित्य-आयुर्वेद-ज्यौतिष-आचार्यः

**चौखम्बा सुरभारती प्रकाशन**

वाराणसी

श्री:

# प्रबन्धसंग्रहः

### मङ्गलाचरणम्

शब्दानुशासनं सर्वं पाणिनिर्लब्धवान् यतः ।
तं प्रणम्य शिवं साम्बं प्रबन्धस्तन्यतेऽधुना ॥ १ ॥
वैयाकरणमाश्रित्य प्रबन्धानां सुसङ्ग्रहः ।
कृतश्छात्रप्रबोधाय ब्रह्मानन्दत्रिपाठिना ॥ २ ॥

## व्याकरणशास्त्रम्--शब्दानुशासनं वा

विदितचरमेव इदं सर्वेषां गीर्वाणभाषाऽध्ययनरसिकानां, यद् व्याकरणशास्त्रं विद्वत्समाजे कीदृशं गौरवं भजतीति, समेषां दर्शनानां काव्यनाटकादीनां तथा आयुर्वेद-ज्यौतिषप्रभृतिशास्त्राणामपि सम्यग् ज्ञानार्थं व्याकरणशास्त्रज्ञानं नितान्तम् आवश्यकम् । जागर्ति च कस्यचिदभियुक्तस्य वचनमिदम् **'अव्याकरणमधीतं भिन्नद्रोण्या तरङ्गिणीतरणम् । भेषजमपथ्यसहितं त्रयमिदमकृतं वरं न कृतम्'** । सुस्पष्टमिदं पद्यम् ।

अपरञ्च—'यद्यपि बहुनाधीषे तदपि पठ पुत्र ! व्याकरणम् ।'

तदिदं व्याकरणं शास्त्रं गीर्वाणभाषायां न केवलं शब्दसाधुत्वमात्रबोधकं किन्तु दर्शनपदवीं प्रापितं मोक्षहेतुभूतं जोघुष्यते । तथा च उक्तं हरिणा—'इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् । इयं सा मोक्षमाणामजिह्मा राजपद्धतिः ॥' उक्तञ्च भगवता पतञ्जलिनाऽपि—'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति' महाभाष्ये ।

तत्र 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन, इति वि+आङ्पूर्वकात् कृधातोः 'करणाधिकरणयोश्च' ३।३।११७। इति सूत्रेण करणे ल्युटि, व्याकरणशब्दो निष्पद्यते । एतेन शब्दसाधुत्वबोधसाधनं यत् शास्त्रं

तदेव व्याकरणमिति निगद्यते । 'तस्मात् शास्त्रं प्रमाणं ते कार्याकार्य-व्यवस्थितौ' । इति भगवदुक्त्या सर्वत्र कार्याकार्यव्यवस्थितौ साधुत्वाऽ-साधुत्वनिर्णये शास्त्रमेव प्रमाणत्वेन स्वीक्रियते ।

व्याकरणं शब्दानुशासनञ्च इति शब्दौ पर्यायभूतौ वर्तेते । शब्दानु-शासनपदेन व्याकरणस्यैव अर्थः सुलभतया बोध्यते, तथा हि महाभाष्यस्य प्रारम्भे भगवान् पतञ्जलिः प्राह–'**अथ शब्दानुशासनम्**' शब्दानुशासनं नाम शास्त्रम् अधिकृतं वेदितव्यमिति । तत्र कस्य व्याकरणशास्त्रम् इति संज्ञा, इति जिज्ञासायां सूत्र-वार्तिकयोरेव प्रायः ग्रहणमाम्नातम् । भाष्य-वृत्तिप्रभृतयो ग्रन्थास्तु अनयोः विवरणपरा वर्तन्ते । क्वचित् भाष्य-कारस्य इष्टयः प्रयोगाश्चापि प्रमाणत्वेन स्वीक्रियन्ते । यथा भट्टोजि-दीक्षिताः बहुव्रीहिप्रकरणे 'ठक्छसोश्च' इति वार्तिके आहुः । एतद्वार्तिकं, 'एकतद्धिते च' इति सूत्रञ्च न कर्तव्यम् । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति भाष्यकारेष्टचा गतार्थत्वात् ।

तत्र '**यथोत्तरं मुनीनां प्रामाण्यम्**' इत्युक्त्या अन्ततो भगवतो भाष्य-कारस्य वचनेनैव साधुत्वनिर्णयो भवति । प्राचीनास्तु अस्याः परिभा-षायाः उत्तरोत्तरमुनिवचने पूर्वपूर्वमुनेः तात्पर्यम् इत्यर्थः, न उत्तरोत्तर-मुन्यपेक्षया पूर्वपूर्वमुनेरप्रामाण्यम् इति अर्थं कल्पयन्ति । यथा – अजन्त-पुंल्लिङ्गप्रकरणे श्रीमद्भट्टोजिदीक्षिताः प्राहुः—'भाष्यकारस्तु त्वकत्-पितृको मकत्पितृक इति रूपे इष्टापत्तिं कृत्वा एतत् सूत्रं ( न बहुव्रीहौ १।१।२९ ) प्रत्याचख्यौ 'यथोत्तरं मुनीनां प्रामाण्यम् ।' इति ।

पाणिनीयसूत्राणि, वार्तिकानि, भाष्यञ्च इत्येषा त्रयी, आकरशब्देन व्यवह्रियते । क्वचित् कैयटवचनस्यापि आकरशब्देन ग्रहणं दृश्यते । तत्र पाणिनीयसूत्राण्येव व्याकरणशास्त्रस्य मूलभूतानि । तत्र उक्तानुक्त-दुरुक्तानां चिन्तार्थं वार्तिकानि प्रवर्तन्ते । तथा चोक्तम्—'उक्तानुक्त-दुरुक्तानां चिन्ता यत्र प्रवर्तते । तद्वाक्यं वार्तिकं प्राहुर्वार्तिकज्ञा विचक्षणाः' ।। भाष्यन्तु अनयोर्विवरणपरम् उदाहरणप्रत्युदाहरणप्रदर्श-कञ्च । तत्र यद्यपि—

'इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ च शाब्दिकाः' ।। इति ।।

अन्येषामपि व्याकरणानि सन्ति, तथापि वैदिकलौकिकोभयसङ्ग्राहकत्वात् पाणिनीयं व्याकरणमेव सर्वैराद्रियते । 'असौ नवव्याकरणार्थवेत्ता' । इति, हनूमन्तमुद्दिश्य महर्षिवाल्मीकेः वचनेन तत्काले नवव्याकरणान्यासन्, इति अनुमीयते । तत्र सर्वेषामपि शास्त्राणां मूलभूतानि सूत्राणि एव दृश्यन्ते । यथा—व्याकरणशास्त्रे पाणिनिप्रभृतिभिर्विरचितानि सूत्राणि, न्यायशास्त्रे गौतमनिबद्धानि सूत्राणि, वैशेषिकशास्त्रे कणादकृतानि सूत्राणि, साङ्ख्यशास्त्रे कपिलमुनिग्रथितानि सूत्राणि प्रसिद्धानि । **'पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः'** ४ । ३ । ११० । **'कर्मन्दकृशाश्वादिनिः'** ४।३।१११ । इति पाणिनिसूत्राभ्यां ज्ञायते, यत् पाणिनिकाले नटसूत्राणि, भिक्षुसूत्राणि तेषाम् अध्येतारश्चासन्निति । तत्र सङ्क्षिप्ततमशब्दैः सिद्धान्तप्रतिपादकं वाक्यं सूत्रमिति व्यवह्रियते । तथा चोक्तम्—

**'अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम् । अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः'** ।। सूत्रेषु सङ्क्षेपस्य अभ्यर्हितत्वात् जागर्ति वैयाकरणनिकाये आभाणकः—'अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति । स्वल्पाक्षरत्वात् सूत्राणि स्वल्पेनैव परिश्रमेण कण्ठस्थीकर्तुं प्रभवन्ति शिशुबुद्धयोऽपि का कथा च इतरेषाम् ?

सूत्राणां सम्यग्ज्ञानार्थं वार्तिकानामपि अपेक्षा वर्तते । वार्तिकानि यद्यपि प्रायः कात्यायनविरचितानि तथापि अन्येषामपि दृश्यन्ते । तथा च महाभाष्ये—'सौनागाः पठन्ति,' 'भारद्वाजीयाः पठन्ति' इत्यादिवचनैः अन्येषामपि वार्तिकानि सङ्गृहीतानि दृश्यन्ते । पूर्वं गुरुमुखादेव सूत्रवार्तिकार्थज्ञानं शिष्याणां भवतिस्म, कालान्तरे बुद्धेर्ह्रासात् सूत्रवार्तिकार्थवर्णनोदाहरणप्रत्युदाहरणप्रदर्शिकाः कुणिप्रभृतिभिर्विरचिताः वृत्तयो लब्धप्रसारा बभूवुः ।

अधुना समुपलब्धेषु वृत्तिग्रन्थेषु **वामनजयादित्यविरचिता काशिकावृत्तिः** प्राचीनतमा वरीवर्ति । कालान्तरेण बालानां सुकुमारबुद्धित्वात् सरलानां वृत्तिग्रन्थानामपि ज्ञानं दुष्करमासीत्, इति तद्विवरणार्थं